# Shasta Dashakam

# શાસ્તાદશકમ્

## Document Information

Text title : shAstAstutidashakam 2

File name : shAstAdashakam2.itx

Category : deities_misc, ayyappa, stotra, dashaka

Location : doc_deities_misc

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : August 1, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 1, 2020

*sanskritdocuments.org*

# શાસ્તાદશકમ્

લોકવીરં મહાપૂજ્યં સર્વરક્ષાકરં વિભુમ્ ।
પાર્વતીહૃદયાનન્દં શાસ્તારં પ્રણમામ્યહમ્ ॥ ૧॥

વિપ્રપૂજ્યં વિશ્વવન્દ્યં વિષ્ણુ-શમ્ભોઃ પ્રિયં સુતમ્ ।
ક્ષિપ્રપ્રસાદનિરતં  શાસ્તારં પ્રણમામ્યહમ્ ॥ ૨॥

મત્તમાતઙ્ગગમનં કારુણ્યામૃતપૂરિતમ્ ।
સર્વવિઘ્નહરં દેવં શાસ્તારં પ્રણમામ્યહમ્ ॥ ૩॥

અસ્મત્કુલેશ્વરં દેવમસ્મચ્છત્રુવિનાશનમ્ ।
અસ્મદિષ્ટપ્રદાતારં શાસ્તારં પ્રણમામ્યહમ્ ॥ ૪॥

પાણ્ડ્યેશવંશતિલકં કેરળે કેલિવિગ્રહમ્ ।
આર્તત્રાણપરં દેવં શાસ્તારં પ્રણમામ્યહમ્ ॥ ૫॥

ત્ર્યમ્બકપુરાધીશં ગણાધિપસમન્વિતમ્ ।
ગજારૂઢમહં વન્દે શાસ્તારં પ્રણમામ્યહમ્ ॥ ૬॥

શિવવીર્યસમુદ્ભૂતં શ્રીનિવાસતનૂદ્ભવમ્ ।
શિખિવાહાનુજં વન્દે શાસ્તારં પ્રણમામ્યહમ્ ॥ ૭॥

યસ્ય ધન્વન્તરિર્માતા પિતા દેવો મહેશ્વરઃ ।
તં શાસ્તારમહં વન્દે મહારોગનિવારણમ્ ॥ ૮॥

ભૂતનાથદયાનન્દ સર્વભૂતદયાપર ।
રક્ષ રક્ષ મહાબાહો શાસ્ત્રે તુભ્યં નમો નમઃ ॥ ૯॥

આશ્યામ કોમલવિશાલતનું વિચિત્રં
    વાસો વસાનમરુણોત્પલદામહસ્તમ્ ।
ઉત્તુઙ્ગરત્નમકુટં કુટિલાગ્રકેશં
    શાસ્તારમિષ્ટવરદં શરણં પ્રપદ્યે ॥ ૧૦॥

ઇતિ શાસ્તાદશકં સમ્પૂર્ણમ્ ।

The first five verses are termed as pancharatnam and
are in a separate file.

Encoded and proofread by PSA Easwaran

*Shasta Dashakam*
pdf was typeset on August 1, 2020

Please send corrections to *sanskrit@cheerful.com*